# Shri Hanumat Tandava Stotram

# શ્રીહનુમત્તાણ્ડવસ્તોત્રમ્

## Document Information

Text title : hanumattANDava stotram

File name : hanumattANDavastotram.itx

Category : hanumaana, stotra

Location : doc_hanumaana

Author : Traditional

Latest update : July 27, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 14, 2024

*sanskritdocuments.org*

# શ્રીહનુમત્તાણ્ડવસ્તોત્રમ્

વન્દે સિન્દૂરવર્ણાભં લોહિતામ્બરભૂષિતમ્ ।
રક્તાઙ્ગરાગશોભાઢ્યં શોણાપુચ્છં કપીશ્વરમ્ ॥

ભજે સમીરનન્દનં, સુભક્તચિત્તરઞ્જનં,
 દિનેશરૂપભક્ષકં, સમસ્તભક્તરક્ષકમ્ ।
સુકણ્ઠકાર્યસાધકં, વિપક્ષપક્ષબાધકં,
 સમુદ્રપારગામિનં, નમામિ સિદ્ધકામિનમ્ ॥ ૧॥

સુશઙ્કિતં સુકણ્ઠભુક્તવાન્ હિ યો હિતં વચ-
સ્ત્વમાશુ ધૈર્ય્યમાશ્રયાત્ર વો ભયં કદાપિ ન ।
ઇતિ પ્લવઙ્ગનાથભાષિતં નિશમ્ય વાન-
રાડધિનાથ આપ શં તદા, સ રામદૂત આશ્રયઃ ॥ ૨॥

સુદીર્ઘબાહુલોચનેન, પુચ્છગુચ્છશોભિના,
 ભુજદ્વયેન સોદરીં નિજાંસયુગ્મમાસ્થિતૌ ।
કૃતૌ હિ કોસલાધિપૌ, કપીશરાજસન્નિધૌ,
 વિદહજેશલક્ષ્મણૌ, સ મે શિવં કરોત્વરમ્ ॥ ૩॥

સુશબ્દશાસ્ત્રપારગં, વિલોક્ય રામચન્દ્રમાઃ,
 કપીશ નાથસેવકં, સમસ્તનીતિમાર્ગગમ્ ।
પ્રશસ્ય લક્ષ્મણં પ્રતિ, પ્રલમ્બબાહુભૂષિતઃ
 કપીન્દ્રસખ્યમાકરોત્, સ્વકાર્યસાધકઃ પ્રભુઃ ॥ ૪॥

પ્રચણ્ડવેગધારિણં, નગેન્દ્રગર્વહારિણં,
 ફણીશમાતૃગર્વહૃદ્દૃશાસ્યવાસનાશકૃત્ ।
વિભીષણેન સખ્યકૃદ્વિદેહ જાતિતાપહૃત્,
 સુકણ્ઠકાર્યસાધકં, નમામિ યાતુધતકમ્ ॥ ૫॥

નમામિ પુષ્પમૌલિનં, સુવર્ણવર્ણધારિણં

ગદાયુધેન ભૂષિતં, કિરીટકુણ્ડલાન્વિતમ્ ।
સુપુચ્છગુચ્છતુચ્છલંકદાહકં સુનાયકં
વિપક્ષપક્ષરાક્ષસેન્દ્ર-સર્વવંશનાશકમ્ ॥ ૬॥

રઘૂત્તમસ્ય સેવકં નમામિ લક્ષ્મણપ્રિયં
દિનેશવંશભૂષણસ્ય મુદ્રીકાપ્રદર્શકમ્ ।
વિદેહજાતિશોકતાપહારિણમ્ પ્રહારિણમ્
સુસૂક્ષ્મરૂપધારિણં નમામિ દીર્ઘરૂપિણમ્ ॥ ૭॥

નભસ્વદાત્મજેન ભાસ્વતા ત્વયા કૃતા
મહાસહા યતા યયા દ્વયોર્હિતં હ્યભૂત્સ્વકૃત્યતઃ ।
સુકણ્ઠ આપ તારકાં રઘૂત્તમો વિદેહજાં
નિપાત્ય વાલિનં પ્રભુસ્તતો દશાનનં ખલમ્ ॥ ૮॥

ઇમં સ્તવં કુજેઽહ્નિ યઃ પઠેત્સુચેતસા નરઃ
કપીશનાથસેવકો ભુનક્તિસર્વસમ્પદઃ ।
પ્લવઙ્ગરાજસત્કૃપાકતાક્ષભાજનસ્સદા
ન શત્રુતો ભયં ભવેત્કદાપિ તસ્ય નુસ્ત્વિહ ॥ ૯॥

નેત્રાઙ્ગનન્દધરણીવત્સરેઽનઙ્ગવાસરે ।
લોકેશ્વરાખ્યભટ્ટેન હનુમત્તાણ્ડવં કૃતમ્ ॥ ૧૦॥

ઇતિ શ્રીહનુમત્તાણ્ડવસ્તોત્રમ્ ॥

Encoded and proofread by Madhavi U

*Shri Hanumat Tandava Stotram*

pdf was typeset on February 14, 2024

Please send corrections to *sanskrit@cheerful.com*